# हयग्रीवसम्पदास्तोत्रम्

हयग्रीव हयग्रीव हयग्रीवेति यो वदेत् ।
तस्य निःसरते वाणी जह्नुकन्याप्रवाहवत् ॥१॥

हयग्रीव हयग्रीव हयग्रीवेति वादिनम् ।
नरं मुञ्चन्ति पापानि दरिद्रमिव योषितः ॥२॥

हयग्रीव हयग्रीव हयग्रीवेति यो ध्वनिः ।
विशोभते तु वैकुण्ठकवाटोद्घाटनध्वनिः ॥३॥

श्लोकत्रयमिदं पुण्यं पठतां सम्पदां पदम् ।
वादिराजयतिप्रोक्तं हयग्रीवपदाङ्कितम् ॥४॥

॥ इति वादिराजतीर्थविरचितं हयग्रीवसम्पदास्तोत्रम् ॥